M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 706

Title: Satyanarayan Katha

904

904

Z

		Satyanarayana Katha	Title.
			Author.
			Editor.
			Year, Vols.
Sk		1855. A.D.	Publisher.
904			Remark.

સત્યનારાયણ [illegible]

૧૦૫

श्रीगणेशायनमः॥श्रीव्यासउवाच॥नवांभोजनेत्रंरमाकेलिपात्रंचतुर्बाहुचामी
करंचारुगात्रं॥जगत्त्राणहेतुंरिपौधूमकेतुंसदासत्यनारायणंस्तौमिदेवं॥१॥
श्रीरामंसहलक्ष्मणंसकरुणंसीतान्वितंसात्विकंवैदेहीमुखपद्मलुब्धम
धुपंपौलस्त्यसंहारिणं॥वंदेवंद्यपदांबुजंरूखकरंभक्तानुकंपाकरंश
त्रुघ्नेनहनूमताचभरतेनासेवितंराघवं॥२॥कलिकलुषविनाशंकामसिद्धि
प्रकाशंस्तरवरसुखभासंभूसुरानिघ्नकाशं॥विबुधबुधविलासंसाधुच
र्याविशेषंनृपतिवरचरित्रंभोःशृणुध्वेतिहासं॥३॥एकदानैमिषारण्येऋष
यःशौनकादयः॥अपृच्छन्मुनयःसर्वेसूतंपौराणिकंखलु॥४॥ऋषयऊचुःभगवन्ब्रूहिलोका
नांहितायचचतुर्युगे॥कःपूज्यःसेवितव्यश्चवांछितार्थप्रदायकः॥५॥९
विनायासेनवैकामंप्राप्नुयुर्मानवाःसदा॥सत्यंब्रह्मन्च

सत्य० दैपायनेन रागेणा कीर्तिवर्द्धनं॥६॥ श्रीसूत उवाच॥ एकदा नारदो योगी परा
१ नुग्रहवांछया॥ पर्यटन्विविधान्लोकान्मर्त्यलोकमुपागतः॥७॥ तत्र दृ
ष्ट्वा जनान्सर्वान्नानाक्लेशसमन्वितान्॥ केनोपायेन चैतेषां दुःखनाशो
भविष्यति॥८॥ इति संचिंत्य मनसा विष्णुलोकं गतस्तदा॥ तत्र नारायणं
देवं मेघवर्णं चतुर्भुजं॥९॥ शंखचक्रधरं दिव्यवनमालाविभूषितं॥ दृ
ष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे॥१०॥ नमस्ते वाङ्मनोऽतीतरूपायाऽनं
तशक्तये॥ आदिमध्यांतहीनाय निर्गुणाय गुणात्मने॥११॥ सर्वेषामा
दिभूताय भक्तानामार्तिनाशिने॥ श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभा
षत॥१२॥ किमर्थमागतोसि त्वं किं ते मनसि वर्तते॥ कथयस्व महाभा
ग तत्सर्वं कथयामि ते॥१३॥ श्रीनारद उवाच॥ मर्त्यलोके जनाः सर्वे
नानाक्लेशसमन्विताः॥ तत्कथं शमयेनाथ लघूपायेन तद्वद॥१४॥

श्रोतुमिच्छामि तत्सर्वं कृपाऽस्ति यदि ते मयि॥ श्रीभगवानुवाच॥ साधु पृष्टं त्व
या वत्स लोकाऽनुग्रहकाम्यया॥ यत्कृत्वा मुच्यतेऽघोघात्तच्छृणुष्व वदामि
ते॥ व्रतमस्ति महापुण्यं स्वर्गे च भुवि दुर्लभं॥१५॥ तव स्नेहान्मया विप्र प्रका
शः क्रियतेऽधुना॥ सत्यनारायणस्यैवं व्रतं सम्यग्विधानतः॥१६॥ कृत्वा स
द्यः सुखं भुक्त्वा परतो मोक्षमाप्नुयात्॥ श्रीसूत उवाच॥ तच्छ्रुत्वा भगवद्वा
क्यं नारदो मुनिरब्रवीत्॥१७॥ किं फलं किं विधानं च कृतं केन च तद्व्रतं॥
तत्सर्वं विस्तराद्ब्रूहि कदा कार्यं हि तद्व्रतं॥१८॥ श्रीभगवानुवाच॥ दुःख
शोकादिशमनं धनधान्यप्रवर्द्धनं॥ सौभाग्यसंततिकरं सर्वत्र विजयप्र
दं॥१९॥ यस्मिन्कस्मिन्दिने मर्त्यो भक्तिश्रद्धासमन्वितः॥ सत्यनारायणं
देवं यजेच्चैव निशामुखे॥२०॥ ब्राह्मणैर्बांधवैश्चैव सहितो धर्मतत्परः॥

नैवेद्यं भक्तितो दद्यात्सपादं भोज्यमुत्तमं ॥२२॥ रंभाफलं घृतं क्षीरं गोधूमस्य च चूर्ण
कं ॥ अभावे शालिचूर्णं वा शर्करां च गुडं तथा ॥२३॥ सपादं सर्वभक्ष्याणि चैकी
कृत्य निवेदयेत् ॥ विप्राय दक्षिणां दद्यात्कथां श्रुत्वा जनैः सह ॥२४॥ ततश्च बंधु
भिः सार्द्धं विप्रादिभ्यः प्रदापयेत् ॥ प्रसादं भक्षयेद्भक्त्या नृत्यगीतादिकं चरेत् ॥२५॥ त
तः स्वं स्वं गृहं गच्छेत्सत्यनारायणं स्मरन् ॥ एवं कृते मनुष्याणां वांछासिद्धिर्भवेद्ध्रु
वं ॥२६॥ कृते त्रेतायुगे विष्णुर्द्वापरे नैकरूपधृक् ॥ कलौ प्रत्यक्षफलदः सत्य
नारायणो विभुः ॥२७॥ श्री ऋषय ऊचुः ॥ व्रतेन तपसा किंवा प्राप्यते वांछितं फ
लं ॥ तत्सर्वं श्रोतुमिच्छामः कथयस्व महामते ॥२८॥ श्री सूत उवाच ॥ नारदे नै
व पृष्टः सन् भगवान्कमलापतिः ॥ सुरर्षये यथैवाह तच्छृणु

ध्वं तपोधनाः ॥२९॥ विशेषतः कलियुगे लघूपायोऽस्ति भूतले ॥ कृप
या ब्राह्मणद्वारा प्रकटीकृतवान्स्वयं ॥३०॥ इतिहासमिमं वक्ष्ये सं
वादं हरिविप्रयोः ॥ काशीपुरमिति ख्यातं तत्राऽसीत् ब्राह्मणोऽध
नः ॥३१॥ दीनो गृहाऽश्रमी नित्यं भिक्षुः पुत्रकलत्रवान् ॥ शताऽ
नंद इति ख्यातो विष्णुव्रतपरायणः ॥३२॥ एकदा पथि भिक्षार्थं
गच्छतस्तस्य माधवः ॥ विनीतस्याऽतिकांतस्य स बभूवाऽदिगो
चरः ॥३३॥ वृद्धब्राह्मणवेषेण पप्रच्छ ब्राह्मणं हरिः ॥ क्व यासी
ति द्विजश्रेष्ठ त्वं नित्यं कामेन कथ्यतां ॥३४॥ श्री ब्राह्मण उवाच ॥
भिक्षावृत्तिरहं सौम्य कलत्राऽपत्यहेतवे ॥ याचितुं धनिनां द्वा

सत्य रं व्रजामि धनवांछया ॥३५॥ श्रीनारायण उवाच ॥ भिक्षाहृतिः म
६ हाग र्ह्या विशेषेण कलौ सर्गे ॥ या चिंते धनिनो द्वारं माया हि द्वि
जसत्तम ॥३६॥ ममोपदेशतो विप्र सत्यनारायणं भज ॥ दारिद्र्यशो
कत्रिविधसंतापशमनं हरेः ॥३७॥ चरणं शरणं याहि मोक्षदं म
लमोचनं ॥ एवं संबोधितो विप्रो हरिणा करुणात्मना ॥३८॥ पुनः
पप्रच्छ विप्रोऽसौ सत्यनारायणः क सः ॥ श्रीनारायण उवाच ॥ ब
हुरूपः सत्यसंधः सर्वव्यापी निरंजनः ॥३९॥ इदानीं विप्ररूपेण
तव प्रत्यक्षतां गतः ॥ दुःखोदधिनिमग्नानां तरणिश्चरणं हरेः ॥४०
कृपालाः शरणं याति न तरे विषयात्मकाः ॥ अहह्यसर्वसंभा ६

न्हिताय जगतो द्विज ॥४१॥ अर्चयंस्त्वमनुध्यायंस्त्वमेव प्रकटीकु
रु ॥ इति ब्रुवति विप्रोऽसौ ददर्श पुरुषोत्तमं ॥४२॥ जलदश्यामलं चा
रुचतुर्बाहुं गदादिभिः ॥ पीतांबरं नवांभोजलोचनं स्मितसुंदरं ॥ ४३
वनमालामधुव्रातचुंबितांघ्रिसरोरुहं ॥ रमावत्सस्थलं श्रीम
त्कौस्तुभप्रभयान्वितं ॥४४॥ निशाम्य पुलकांगोऽसौ प्रेमपूर्णा
श्रुलोचनः ॥ स्तवन् गद्गदया वाचा दंडवत्पतितो भुवि ॥४५॥
श्रीशतानंद उवाच ॥ प्रणमामि जगन्नाथं जगत्कारणकारणं ॥
अनाथनाथं शिवदं तापत्रयविमोचनं ॥४६॥ नमः सत्यनाराय
णायाऽस्य कर्त्रे नमः सत्त्वशुद्धाय विश्वस्य भर्त्रे ॥ करालाय

सत्य॰ कालात्मकायास्यहरेर्नमस्तेजगन्मंगलायाऽर्तिहंत्रे॥४७॥
८ धन्योऽस्म्यद्यकृतार्थोऽस्मिभवोद्यसफलोमम॥वाङ्मनोगो
चरोयस्त्वंममप्रत्यक्षतांगतः॥४८॥दिष्टेकिंवर्णयाम्यहो॥
नजानेकस्यवाफलं॥क्रियाहीनस्यमंदस्यदेहोयंसफली
कृतः॥४९॥क्वाऽकिंचनोहंभगवन्क्वप्रजालिरमापते॥वि
धिनाकेनपूज्योसिऽतदाज्ञापयमांप्रभो॥५०॥हरिस्तमाह
मधुरंसस्मितंविश्वमोहनः॥प्रजायांममविप्रेंद्रबहुनाऽपे
क्षितंधनं॥५१॥अनायासेनलब्धेनश्रद्धामात्रेणमांभज॥
ग्राहोगृहोऽजामिलोवामुक्तोऽभूत्सेकदाद्यथा॥५२॥वि ८

धानेनश्रृणुविप्रर्षेमनसाकामयेत्फलं॥यःसत्संभृतसंभारःपूजांकुर्या
द्यथाविधि॥५३॥गोधूमचूर्णपादोर्ध्वप्रस्थादिपरिमाणतः॥दुग्धे
नतावतोपक्वंमिश्रितंशार्करादिभिः॥५४॥गंधपुष्पादिभिश्चैव
वेदमंत्रैर्मनोरमैः॥धूपदीपैर्भक्ष्यभोज्यैर्विभवेसतिविस्तरैः॥५५॥
मिष्टान्नपानतांबूलैःपूजयेद्भक्तितत्परैः॥ब्राह्मणैःस्वजनैश्चै
ववेष्टितःश्रद्धयान्वितः॥५६॥तैश्चसाकंममकथांश्रृणुयाद्भक्ति
तत्परः॥इतिहासंतथाराज्ञोवणिजश्चनिरंतरं॥५७॥कथांतेप्रण
मेद्भक्त्याप्रसादंविभजेत्ततः॥लब्धंप्रसादंभुंजीतमानयन्नऽवि
चारयन्॥५८॥द्रव्यादिभिर्नमेप्रीतिर्भक्त्याकेवलयायथा॥विधि

नानेन विघ्नं द्रष्टुं त्वयिष्येतियेनगः ॥५९॥ पुत्रपौत्रधनैर्युक्तो भुक्त्वा
भोगान्यथेप्सितान् ॥ अंते मत्सान्निध्यमासाद्य मोदते तेन मया सह ॥६०॥
यं यं कामयते कामं प्राप्स्यत्यसममार्चनात् ॥ इत्युक्त्वांतर्दधे वि
ष्णुर्विप्रोऽसौ हृष्टमानसः ॥६१॥ प्रणम्याऽगाद्यथाऽऽदिष्टं मनसा
कौतुकाकुलः ॥ अथ मे द्रव्यगणलब्धेन हृष्टो नारायणो मया ॥६२॥
इति निश्चित्य मनसा भिक्षार्थी नगरं यतः ॥ विनादेहीति वचनैर्ल
ब्धवान् विपुलं धनं ॥६३॥ सकौतुकेन मनसा स जगाम निजं मंदि
रं ॥ हृष्ट्वा तं सर्वमाचख्यौ ब्राह्मणीमानसोदितं ॥६४॥ सादरं सर्वसं
भारमाहरत्तु गतत्वया ॥ आकृष्य बंधुमित्राणि तथा सान्निध्यवर्ति

नः ॥६५॥ सत्यनारायणं देवमियाज स्वगणान्वितः ॥ भक्त्या तुष्टो
ऽथ भगवान् सत्यनारायणः स्वयं ॥६६॥ कामं ददौ तु प्रादुरासीत्क
थोक्ते भक्तवत्सलः ॥ वव्रे विप्रोऽभिलषितमिहाऽमुत्र सुखप्रदं ॥
६७॥ भक्तिं परां भगवति तया तत्संगमार्गिणां ॥६८॥ रथं कुंजरं मे
तुल्ये मंदिरं च हयं चारुचामीकरालंकृतं च ॥ धनं दासदासीग
णांगो महीं च तुल्यायोमदृद्धां हरे देहि दास्यं ॥६९॥ तथास्त्विति
हरिः प्राह ततस्त्वांतर्दधे स्वयं विप्रोऽपि कृतकृत्योऽभूत्सर्वे लोका
विसिस्मिरे ॥७०॥ प्रणम्य भुवि कायेन प्रसादं जगृहुरादरात् ॥ स्वं
स्वं धाम समाजग्मुर्धन्यधन्येतिवादिनः ॥७१॥ प्रचचार ततो लोके स

सत्य० सत्यनारायणाऽर्चनं॥ कामसिद्धिभुक्तिमुक्तिदं कलुषापहं॥७॥इ
६ तिश्रीस्कंदपुराणे रेवाखंडे सूतशौनकसंवादे सत्यनारायणव्रते
तिहासे॥ प्रथमोऽध्यायः॥१॥ ॥श्रीसूत उवाच॥ अथेतिहासं शृणु
त यथा भिल्लाः कृतार्थिनः॥ विचरंतो वने नित्यं निषादाः काष्ठ
वाहिनः॥१॥ वनात्काष्ठानि विक्रेतुं पुरीं काशीं ययुः क्वचित्॥ एक
स्तृष्णाकुलो यातः शतानंदाश्रमं तदा॥२॥ ददर्श द्विजं चाहि
जोत्तमं॥ जलं पीत्वा विस्मितोऽभूत् भिक्षुकस्य कुतो धनं॥३॥ दु
र्बलोऽकिंचनो विप्रो दृष्टास्तेऽद्य महाधनः॥ इति प्रष्टुं देवप्र
णतः प्रोजकिंर्तुदा॥४॥ ऐश्वर्यं ते कुतो विप्र दुर्गतिस्ते कुतो गता॥ ॥६॥

आज्ञापय महासाधो श्रोतुमिच्छामि तत्त्वतः॥ ५॥ श्रीशता
नंद उवाच सत्यनारायणस्यांगसेवया किं न लभ्यते॥ न
किंचित्सुखमाप्नोति विना तस्यानुकंपया॥ ६॥ श्रीनिषाद उ
वाच॥ अहो किमिति माहात्म्यं सत्यनारायणार्चने॥ विधा
नं सोपचारं च उपदेष्टुं त्वमर्हसि॥७॥ साधूनां समचित्तानां
मुपकारवतां सदा॥ न गोप्यं विद्यते किंचिदार्त्तानामार्तिनाशि
नां॥८॥ इति पृष्टो विधिं विप्रः सेतिहासमथाब्रवीत्॥ श्रीश
तानंद उवाच॥ राजासीद्धार्मिकः कश्चित्केदारमणिपूरके॥ ९
चंद्रचूड इति ख्यातः प्रजापालनतत्परः॥ शांतो मधुरवाक्धी

सत्य० ७

रो नारायणपरायणः ॥१०॥ समाश्रमं समायातः सत्यनाराय
णाऽर्चने ॥ विधानं श्रोतुकामो सो प्राह मां सादरं वचः ॥११॥ मया
यत्कथितं तस्मै तन्निबोध निषादज ॥ संकल्प्य मनसा का
मं निष्कामो वा जनः क्वचित् ॥१२॥ पूजासंभारमाहृत्य कृत
नित्याचितक्रियः ॥ देवालये स्थंडिले या मंते पूजां समारभे
त् ॥१३॥ सायंकाले शिलां स्थाप्य पूर्णकुंभसमन्वितां ॥ स्वाचा
र्यं स्वजनं चैव समाहूय सतज्जनान् ॥१४॥ गोधूमचूर्णपा
दोर्ध्वप्रस्थादिपरिमाणतः ॥ दुग्धेन तावता पक्वं शर्करादि
समन्वितं ॥१५॥ पायसापूपसंपंच दधिक्षीरमथाहरेत् ॥

उच्चावचैः फलैः पुष्पैर्धूपदीपैर्मनोरमैः ॥१६॥ पूजयेत्परया
भक्त्या विभवे सति विस्तरैः ॥ न तुष्ये द्रव्यसंभारैर्भक्त्या केव
लया यथा ॥१७॥ भगवान्परितः पूर्णो न मानं ह्यणुने क्वचित् ॥ दु
र्योधनकृतं हित्वा श्रीकृष्णो भक्तवत्सलः ॥१८॥ विदुरस्याश्र
मे चासीदातिथ्यं जगृहे विभुः ॥ सुदाम्नः पृथुकान् जग्ध्वाय
यो मर्त्यैस्तु दुर्लभाः ॥१९॥ संपदो दाद्धरिः प्रीत्या भक्तिमात्र
मपेक्षते ॥ गोप्यो गृध्रो वणिग्व्याधो हनुमान्सविभीषणः
२०॥ येऽन्ये तच्चिंतकादैत्या स्तन्न काया धवादयः ॥ नाराय
णांतिकं प्राप्ता मोदंते चापि नित्यशः ॥२१॥ इति श्रुत्वा नरपः

सत्य०
२

नि[illegible] हे सुरा॥ त[illegible]॥ [illegible] पूजां [illegible]
मास्थितः॥२२॥ निषादत्वमपि प्रीत्या सत्यनारायणं भज।
इह लोके सुखं भुक्त्वा प्राप्स्यसे चांतिकं हरेः॥२३॥ श्रीसूत उ
वाच॥ ततः कृतत्योनिषादो भूत्वा नम्य द्विजपुंगवं॥ स गत्वा
स्वगणान्प्राह माहात्म्यं हरिसेवने॥२४॥ ते हृष्टमनसः
सर्वे समयं चक्रुरादृताः॥ सत्यनारायणः पूज्यः काष्ठलब्धे
न यत्नतः॥२५॥ इति निश्चित्य मनसा काष्ठं विक्रीय ते भि
रे॥ चतुर्गुणं धनं गृह्य स्वं स्वं भवनमाययुः॥२६॥ मुदा स्त्री
भ्यः समाचख्युर्वृत्तांतं सर्वमादितः॥ ताः श्रुत्वा हृष्टमन

सः पूजासंभारमादरात्॥२७॥ भर्तॄणामाज्ञया चक्रुर्यथाश्रुत
विधानतः॥ ततो मिलित्वा स्वगणैः पूजां कृत्वा यथोचितं॥२८॥
कथावसाने ते भक्त्या प्रणेमुर्गतपातकाः॥ स्वजातिभ्यः परेभ्य
श्च प्रसादं ते बिभेजिरे॥२९॥ पूजाप्रभावतो भिल्लाः पुत्रदारा
दिभिर्युताः॥ भुक्त्वा भोगान्यथेष्टं ते वै स्वं धाम भेजिरे॥३०॥
अथान्यां वर्णयिष्यामि गाथां साधूपचारितां॥ साधुर्यथा
कृतार्थोभून्नृपतेरुपदेशतः॥३१॥ मणिपूरपती राजा चंद्रचू
डो महायशाः॥ सह प्रजाभिरानर्चे सत्यनारायणं विभुं॥३२॥
अथ रत्नपुरस्थोपि साधुर्लक्षपतिर्वणिक्॥ धनैरापूर्यतर

स०क० णी सह गच्छन्नदीतटे ॥ ३३ ॥ ददर्श बहुलं लोकं नानावेशवि
९ लासिनं॥ वेदवादांश्च शुश्राव गीतवादित्रसंयुतान्॥ मणिमुक्ता
विरचितैर्वितानैः समलंकृतं॥ रम्यस्थानं समालोक्य कर्णधारं स
मादिशत्॥ ३५॥ विश्रामयात्र तरणीरिति पश्यामि कौतुकं॥ भर्त्रा
दिष्टस्तथा चक्रे कर्णधारः सहानुगैः॥ ३६॥ तरणीभ्यः समुत्तीर्य
मल्ललीलाविलासिनः॥ कर्णधारानुगा वीरा युयुधुर्मल्ललीलया
॥ ३७॥ स्वयमुत्तीर्य सामात्यो लोकान्पप्रच्छ सादरं॥ यागस्थानं
समालोक्य प्रशस्तं समुदं ययौ॥ ३८॥ किमत्र क्रियते सभ्याः भ
वद्भिर्लोकपूजितैः॥ सभ्या ऊचुरनेनेति सत्यनारायणो विभुः ९

॥ ३९॥ पूज्यते बंधुभिः सार्द्धं राज्ञा लोकानुकंपिना॥ त्वमप्यत्र क्षणं
तिष्ठ प्रसादं भुंक्ष्व सादरं॥ ४०॥ कथां श्रुत्वा रीतिरियं सत्यनारायणार्च
ने॥ साधुः पप्रच्छ करणे किं फलं को विधिस्तथा॥ ४१॥ श्रीसभ्या ऊ
चुः॥ नारायणार्चनफलं वक्तुं नालं चतुर्मुखः॥ विस्तराच्छृणु सं
क्षेपं कथयामस्त वाग्रतः॥ ४२॥ निर्द्धनोपि धनाढ्यः स्यादपुत्रः
पुत्रवान् भवेत्॥ भ्रष्टराज्यो लभेद्राज्यमंधोऽपि स्यात्सुलोचनः
॥ ४३॥ मुच्यते बंधनाद्बद्धो निर्भयः स्याद्भयातुरः॥ सर्वान्का
मानवाप्नोति पूजको मुच्यते भयात्॥ ४४॥ मनसा कामयेद्यंयं
लभेत्तं तं स कामतः॥ विधानं सततः श्रुत्वा चैलं बध्वा गले स

कृतं ॥४५॥ दंडवत्प्रणिपत्याह साधुः सभ्याग्रतो हरिं ॥ अनप
त्योस्मि भगवन्वृथैश्वर्यो वृथोद्यमः ॥४६॥ पुत्रं वा यदि वा क
न्यां लभेयं त्वत्प्रसादतः प्रतिमां कांचनीं कृत्वा पूजयिष्ये कृपा
निधिं ॥४७॥ सभ्याः सर्वेऽनुमोदंतां कामनासिद्धिरस्तु मे ॥ सभ्याः
प्रत्युत्तरं चक्रुरेवमस्त्विति सादरं ॥४८॥ हरिं प्रणम्य सभ्यांश्च
प्रसादं भुक्तवांस्ततः ॥ जगाम स्वालयं साधुर्मनसा चिंतयन्ह
रिं ॥४९॥ स्वगृहे चागते तस्मिं नार्यो मंगलपाणयः ॥ मंगलानि वि
चित्राणि यथोचितमकुर्वत ॥५०॥ विवेशांतःपुरं साधुस्तदा पर
मकौतुकं ॥ ऋतुस्नाता सती लीलावती पर्यचरत्पतिं ॥५१॥

गर्भं धृतवती साध्वी समये सुषुवे तु सा ॥ कन्यां कमलपत्राक्षीं बां
धवामोदकारिणीं ॥५२॥ साधुः परां मुदं लेभे वितनार धनं बहु ॥ वि
प्रानाहूय वेदज्ञान्कारयामास मंगलं ॥५३॥ लेखयित्वा जन्मपत्रीं ना
मचक्रे कलावतीं ॥ कलानिधिकलेवासौ ववृधे सा कलावती ॥५४
प्रौढां कालेन तां दृष्ट्वा विवाहार्थमचिंतयत् ॥ नगरे कांचनपुरे वणि
क्शंखपतिः श्रुतः ॥५५॥ कुलीनो रूपसंपन्नः शीलौदार्यगुणान्वि
तः ॥ वरयामास तं साधुर्दुहितुः सदृशं वरं ॥५६॥ शुभे लग्ने बहुविधै
र्मंगलैरग्निसंनिधौ ॥ वेदवादित्रनिनदैर्ददौ कन्यां यथाविधि ॥५७
मणिमुक्ताप्रवालानि वसनं भूषणानि च ॥ महामोदमनाः साधुर्मे

गलार्थं ददौ बहु ॥५८॥ प्रेम्णा निवासयामास स्वांते जामातरं ततः ॥ तं
मेने पुत्रवत्साधुः स च तं पितृवत्सुधीः ॥५९॥ भूयस्यतीते काले तु
सत्यनारायणार्चनं विस्मृत्य सह जामात्रा वाणिज्यायययौ पुनः ॥
६०॥ इति श्रीमत्स्कंदपुराणे श्रीसत्यनारायणव्रते निह्लासे रेवाखंडे सा
धुवणिक्चरितकथनं नाम द्वितीयोध्यायः ॥२॥ श्रीसूत उवाच
अथ साधुः समादाय वस्त्राण्याभरणानि च ॥ देशाद्देशांतरं गच्छ
न्ददर्श स मनोहरं ॥१॥ नगरं नर्मदातीरे तत्र वासं चकार सः ॥ कु
र्वन्क्रयं विक्रयं च चिरं तस्थौ महामनाः ॥२॥ मनसा च वचसा चैव
न कृतं सत्यसेवनं ॥ तेन कर्मविपाकेन तापमायाचिराद्वणिक् ॥

३॥ अथ तद्देशपालस्य हृतं चौरैर्महाधनं ॥ श्रुत्वा क्रुद्धो भवद्राजा के
ष्टपालमथाब्रवीत् ॥४॥ चौरैः सह धनं तूर्णमानयस्वाद्य माचिरं ॥
मुक्तामालाश्च बहुधा नीताश्चंद्रसमप्रभाः ॥५॥ नो चेद्धनिष्ये स
गणामिति भृत्यं समादिशत् ॥ धनमप्राप्य कुत्रापि चोरान्वा राजकिं
करः ॥६॥ हंता मां सगणं राजा किं करोमि कुतः सुखं ॥ विलक्ष्य पंच
रात्रेण वणिजं तं महाधनं ॥७॥ चोरोयमिति निश्चित्य तं बबंधात्म
रक्षणात् ॥ साधुं तं सह जामात्रा नृपांतिकमथानयत् ॥८॥ प्रतिकू
ले हरौ तस्मिन् राज्ञापि न विचारितं ॥ धनालये धनं नीत्वा बध्नीते
मौ सुदुर्मती ॥९॥ कारागारे लोहमयैः शृंखलैर्गलपादयोः ॥१०

तिराज्ञयादूतास्तथाचक्रुर्निबंधनं॥१०॥जामात्रासहितःसाधुर्वि
ललापभृशंमुहुः॥हापुत्रताततातेतिजामातःक्वगतंधनं॥११॥क्व
स्थिताचसतीभार्यायस्यधातुर्विपर्ययं॥निर्दयेनविधात्रावाहं
तुष्टस्त्येनछद्मिना॥१२॥निमग्नोदुःखजलधौकोवात्रास्यतिसं
कटात्॥मयाबहुतरंधातुर्विप्रियंवापुराकृतं॥१३॥कर्मणःकस्य
पाकोयंनजानेतीवदुःखितः॥श्रीसूतउवाच॥समाःश्वशुरजामा
त्रोर्दर्शयुश्चविषादिनोः॥१४॥अगाद्बहुतरःकालःकारागारस्थयो
स्तदा॥प्रतिकूलेहरौतस्मिन्धनंयत्तद्गृहेस्थितं॥१५॥हृतंच
त्र्यवनीपालैश्चौरैर्भार्यापिदुःखिता॥अथसाध्वीसहसुताप

त्युःकल्याणमिच्छती॥१६॥वासोलंकरणादीनिविक्रीयबुभुजेकि
ल॥तस्मिन्नपिक्षीयमाणेततःसैरंध्र्यमाचरत्॥१७॥अथैकस्मिन्
दिनेकन्याभोजनेनविवर्जिता॥गताविप्रगृहेपश्यत्सत्यनारायणा
र्चनं॥१८॥प्रार्थयंतंजगन्नाथंदृष्ट्वासाप्रार्थयद्धरिं॥सत्यनारा
यणहरेपिताभर्ताचमेगृहं॥१९॥आगच्छत्वर्चयिष्यामिभवं
तमितिनिश्चितं॥तथैवब्राह्मणेरुक्ताततःसास्वालयंययौ॥
२०॥मात्रानिर्भर्त्सितेयंतंकालंकुत्रस्थिताशुभे॥दृष्टांतंकथया
माससत्यनारायणार्चनं॥२१॥कलौप्रत्यक्षफलदंसर्वदाक्रिय
तेनरैः॥कर्तुमिच्छाम्यहंमातराज्ञापयितुमर्हसि॥२२॥देशमा

स०क० यातुजनकः स्वामीच ममकामना॥ श्रीसूतउवाच॥ मात्रासहेति
१३ निश्चित्यभिक्षार्थंनगरंगता॥२३॥ अनायासेनसंप्राप्तंद्रव्यंबहु
गुणान्वितं॥ तेनसंभृतसंभारैः पूजांचक्रेकलावती॥२४॥ लीला
वतीसहतया यथाविधियथोचितं॥ कर्मणातेनतुष्टोभूत्सत्य
नारायणःस्वयं॥२५॥ नर्मदातीरनगरे राज्ञेस्वप्नंसमादिशत॥
रात्रिशेषेःस्वपर्यंके निद्रांकुर्वतिराजनि॥२६॥ उवाचविप्ररूपे
णबोधयन्श्लक्ष्णयागिरा॥ उत्तिष्ठोत्तिष्ठराजेंद्रतौसाधूपरि
मोचय॥२७॥ अपराधंविनाबद्धौनोचेच्छूलंभवेत्तव॥ इत्यु
क्त्वांतर्द्धधे विष्णुर्विनिद्रोनृपतिस्तदा॥२८॥ विस्मितःसहसो

त्थायदध्यौब्रह्मसनातनं॥ गुरुपादांबुजंचैवकृतनित्योचित
क्रियः॥२९॥ स्नात्वाघृतादिमांगल्यं सिंहासनमुपाविशत॥ प्र
णम्यविप्रान्स्वामात्यैर्नृपःस्वप्नंसमादिशत॥३०॥ श्रुत्वाराज्ञो
वचःसभ्याउत्तरंचददुर्मुदा॥ राजंस्तेयंच्छूलंस्वप्नेसत्यमेतन्न
संशयः॥३१॥ तेषांमतंसमाज्ञाय तावानेतुंसमादिशत॥ आनी
यसाधुंपप्रच्छसत्यमाशुंव्यसनन्निधौ॥३२॥ कुत्रत्यौवांकुलंकिंवा
वसतिःकस्यवापुरे॥ कथमत्रागतौवापिप्राप्तौकेनदशामिमां
॥३३॥ श्रीसाधुरुवाच॥ रम्येरत्नपुरेवासौवणिग्जातौजनिर्मम
॥ वाणिज्यार्थंमहाराजवाणिज्यंजीविकावयोः॥३४॥ मणिमुक्ता

दिविक्रेतुमागतौतवपत्तने॥तवदूतैःसमानीतौबध्वाचौरावि॰
माविति॥३५॥आवान्नचौरौराजेंद्रतत्वतस्त्वंविचारय॥प्रतिकूले
विधौकांकांदशान्नाप्नोतिवैपुमान्॥विनापराधंश्रीकृ स्मामणि
चौर्यापवादवान्॥निवेदितमशेषेणपुण्यश्लोकशिखामणे
॥३७॥युक्तंयत्कुरुराजेंद्रेत्युक्त्वातूष्णींबभूवह॥श्रुत्वातंनि
श्चयंज्ञात्वातयोर्बंधनमोचनं॥३८॥कारयित्वापरिष्कारंका
रयामासनापितैः॥तैलैःसुरभिभिश्चैववस्त्रगंधैःसलिलैस्तथा
॥३९॥भोजयित्वास्वभोज्येनराजालंकारवाहनैः॥महार्हव॰
स्त्राभरणैःपूजयामासभूपतिः॥४०॥अब्रवीत्पूजितःसाधुर्जामा

तृसहितोमुदा॥कारागारेबहुविधंदुःखमाप्तमतःपरं॥४२॥आज्ञा
पयमहाराजदेशंयातुंकृपानिधे॥श्रुत्वासाधुवचोराजाप्राहकोषा
धिकारिणं॥४२॥तरणीभ्योधनंनीतंतेनताःपरिपूरय॥राजकिंकर
इत्युक्तस्तथाचक्रेभिमानयन्॥४३॥प्रेम्णानौप्रापयामासस्वदे॰
शंधरणीपतिः॥जामात्रासहितःसाधुर्गीतवादित्रमंगलैः॥४४॥
स्वदेशंचलितोथापिनचक्रेहरिसेवनं॥सत्यनारायणोदेवःप्रत्यक्ष
फलदःकलौ॥४५॥येनसंपूजितोदेवस्तस्मैमुक्तिप्रदोभवेत्॥
इतिश्रीस्कंदपुराणेरेवाखंडेश्रीसत्यनारायणव्रतेतिहासेसाधुप्र
याणंनामतृतीयोध्यायः॥३॥श्रीसूतउवाच॥तापत्रयनुदोविष्णो॰

श्चरितंपरमाद्भुतं॥शृण्वंतिसुधियोनित्यंतेपियांतिपरंपदं॥१॥
सएवतापसोभूत्वाचक्रेसाधुविडंबनं॥श्रीतापसउवाच॥किमा
नीतंधनंसाधोसत्यंब्रूहिममाग्रतः॥२॥मामनादृत्यचकथंव्रजसि
त्वरयान्वितः॥श्रीसूतउवाच॥प्रत्युत्तरमदात्साधुःक्षिप्रंनौकाश्च
सत्वरं॥३॥भोस्वामिन्मेधनंस्वल्पंलतापत्रादिपूरिताः॥नौकाग
च्छामिमेस्थानंविलंबेनात्रकिंफलं॥४॥इत्युक्तस्तापसःप्राहत
थास्त्वितिवचःक्षणात्॥धनमंतर्दधेतत्रलतापत्रादिशेषितं॥५॥
धनंनौकासुनास्तीतिसाधुश्चिंतापरोभवत्॥किमिदंकस्यवाहेतो
र्धनंकुत्रगतंमम॥६॥वज्रपाता हतइवभ्रष्टंदुःखितमानसः॥किं

करोमिक्वगच्छामिक्वतिष्ठामिगतेधने॥७॥इतिमूर्छांगतःसाधुर्विलला
पपुनःपुनः॥जामात्रा बोधितःपश्चात्तापसंतंजगामह॥८॥गलेवसन
माधायप्रणनामसतापसं॥कोभवानितिपप्रच्छदेवोगंधर्वईश्वरः
॥९॥देवदेवोथवाकोपिनजानेतवविक्रमं॥आज्ञापयमहाभागम
हिडंबनकारणं॥१०॥श्रीतापसउवाच॥आत्मनःशत्रुरात्मैवतथामि
त्रमवेहिभो॥त्यजमोहंस्वस्थचित्तःस्वापराधंविचारय॥११॥इतिप्र
बोधितःसाधुर्नबुबोधमहाधनः॥पुनःसतापसःप्राहकृपयापूर्वकी
र्तितं॥१२॥चंद्रचूडोयदाप्राच्यःसत्यनारायणंनृपः॥अनपत्येन
सुचिरंपुत्रकन्यार्थिनात्वया॥१३॥प्रार्थितंतस्यसंपन्नमिदानीस्मर्य

स० क० तेनकिं॥सत्यनारायणोदेवो विश्वव्यापीफलप्रदः॥१४॥तमनादृ
९६ त्यदुर्बुद्धे कुतःशंभवितानव॥इतिप्रबोधितस्तेनसाधुरात्मानमादरा
त्॥१५॥पुरालब्धवरंस्मृत्वासस्मारजगदीश्वरं॥सत्यनारायणंदेवं
तापसंतंददर्शह॥१६॥प्रणम्यभुविकायेनपरिक्रम्यपुनःपुनः॥तु
ष्टावतापसंतत्रसाधुर्गद्गदयागिरा॥१७॥श्रीसाधुरुवाच॥सत्यरूपंस
त्यसंधंसत्यनारायणंहरिं॥यत्सत्यत्वेनजगतःसत्यत्वंत्वांनमाम्य
हं॥१८॥त्वन्मायामोहितात्मानोनपश्यंत्यात्मनःशुभं॥दुःखांभोधौ
सदामग्नाःदुःखेचसुखमानिनः॥१९॥मूढोहंधनगर्वेणमदांधीकृ
तलोचनः॥नजानेत्वात्मनःक्षेमंदेववंदेविमूढधीः॥२०॥क्षमस्व

ममदौरात्म्यंतमोधाम्नोहरेविभो॥आज्ञापयात्मदास्यंमेयेनतेच
रणंभजे॥२१॥इतिस्तुत्वालक्षमुद्रास्थापयित्वापुरोधसि॥गेहं
गत्वापूजयिष्येसत्यनारायणंप्रभुं॥२२॥तुष्टोनारायणःप्राहवांछि
तापूर्णाभवंतुते॥पुत्रपौत्रसमायुक्तोभुक्त्वाभोगाननुत्तमान्॥२३
मामर्चयसदाभक्त्यामत्स्थानंनिश्चयंगमिष्यसि॥स्तोष्यतेत्वत्प्रगी
तेनस्तोत्रेणभुविमानवः॥२४॥तुष्टोहंतस्यदास्यामिवरंयेनाऽ
खिलंलभेत्॥इत्युक्त्वांतर्दधेविष्णुःसाधुश्चस्वालयंययौ॥२५॥
आगत्यनगराभ्याशेसप्राहिणोद्दूतमालयं॥गृहमागत्यदूतोपि
प्राहलीलावतीप्रति॥२६॥जामात्रासहितःसाधुःकृतकृत्यःसमा

गतः॥ सत्यनारायणार्चायां स्थिता साध्वी सकन्यका॥ २७॥ तत्स
माप्य मुदा साध्वी कृतकौतुकमंगला॥ सखीगणैः परिवृता नौ-
कां नीराजितुं गता॥ २८॥ कलावती त्वकृत्वाय प्रसादं सत्वरं ययौ॥
पातुं पतिमुखांभोजं चकोरीव दिनात्यये॥ २९॥ अवज्ञया प्रसादस्य
नौका शंखपतेरथ॥ निमग्ना जलमध्ये तु जामात्रा सह तत्क्षणात्॥ ३०
मग्नं जामातरं पश्यन् विललाप महाधनैः॥ हा हतोऽस्मीति केनेदं
कृतं मेति विडंबनं॥ ३१॥ कारागारे बहुविधं दुःखं यत्तु समागतं॥ त-
स्माद् दुःखतरं त्वेतद्धा हा किं विधिना कृतं॥ ३२॥ पुत्रहीनोऽस्मि विधि-
ना पुरैवाहं विडंबितः॥ त्वयाकृतेन न सहितो हतः किं जीवितेन मे॥

अथ लीलावती तत्र गता मंगलसंयुता॥ जामातुर्मरणं श्रुत्वापपात भु-
वि मूर्छिता॥ ३४॥ विलपंती सुतां दृष्ट्वा हा हतास्मीति वादिनी॥ अहो
विधे त्वमज्ञोसि त्यक्तार्या सुता त्वियं॥ ३५॥ कथमीदृग्दशां नीता
धिगस्तु करुपास्यते॥ शुशोच सा सकरुणं सुताननमुद्वीक्षती॥ ३६॥
तथा कलावती भूमौ पपाताकुलविग्रहा॥ रंभेव वातनिहता कांत-
कांतेति वादिनी॥ ३७॥ कलावती चारुकला सुपेशला प्रवालवर्णां-
घ्रितला तिकोमला॥ सरोजनेत्रांबुकणैः प्रसिंचती मुक्तावलीभि-
स्तनमंडलं बभौ॥ ३८॥ हा नाथ सद्गुणनिधे हा कांत प्रियदर्शन
त्वया विरहिता चाहं निराशा विधिना कृता॥ ३९॥ क्व यास्यामि क्व

तिष्ठामिकिंकरोमित्वयाविना॥शरणंकंप्रयास्यद्यकोमेदुःखंवि
मोचयेत्॥४०॥अर्द्धांगंपुरुषस्यस्त्रीवेदवादइतिश्रुतः॥पतिरर्द्धं
गतंकस्मादर्द्धांग्याजीवनंमम॥४१॥कलावतीबहुविधंविलला
पातिदुःखिता॥तथालीलावतीतावत्साधुःसंप्राप्तचेतनः॥४२॥
शुश्रावशब्दमाकाशेसाधोतवकलावती॥भक्त्याप्रसादंगृह्णातुप
तिंप्राप्स्यतिमाशुचः॥४३॥इत्याकाशेवचःश्रुत्वाविस्मितातत्रका
रसा॥नारायणस्यकृपयातरणिस्तत्क्षणात्स्वयं॥४४॥उत्तस्थौरा
खपतिनासर्वलोकस्यपश्यतः॥जामातरंसमालिंग्यमुमुदेसग
णोभृशं॥४५॥मृतंपुनरिवायातमितिलोकाविसिस्मिरे॥तत्रैवसा
धुःसाल्हादोभक्त्यापरमयायुतः॥४६॥पूजासंभारमाहर्तुंभृत्यानाज्ञाप
यत्ततः॥आनयामासविप्रान्व्यानमात्यान्मित्रबांधवान्॥४७॥पूर्वस्था
पितमुद्राश्चनानालंकारतोरणैः॥वितानैर्बहुवर्णैश्चनानारूपामरप्रभैः
॥४८॥विप्रैश्चसंवृतःसाधुर्देवदेवमपूजयत्॥नानाद्रव्योपहारैश्चधूप
दीपैर्मनोरमैः॥४९॥भक्ष्यभोज्यैश्चमिष्टान्नैःफलैर्नानाविधैःशुभैः॥म
णिमुक्तास्वर्णपुष्पैःपद्मचंपकजातिभिः॥५०॥पूजयित्वाविधानेनपरिक्र
म्यकृपानिधिं॥स्तुवन्गद्गदयावाचाप्रणनाममुदायुतः॥५१॥साधुरु
वाच॥नमामिसत्यसंधंतंसत्यनारायणंपरं॥ममापराधिनोमोहव्यये
नोदस्तंकृपालुना॥५२॥तस्करास्तरगनरदुराचाररूपाकरः॥समस्तज

स॰ क॰ गदाधारअपराधान्‌क्षमस्वमे॥५३॥इतिस्तुत्वाजगन्नाथंदंडवत्पतितो
१९ भुवि॥प्रेमाश्रुपूर्णोविमलोहृष्टोत्हृष्टतनूरुहः॥५४॥ब्राह्मणान्भोजया
मासतामात्यान्मित्रबांधवान्॥प्रसादंसगणोभुक्त्वाधनपुत्रादिभिर्यु
तः॥५५॥इहलोकेसुखंभुक्त्वाचांतेविष्णुपदंययौ॥विधिनानेनयोभक्त्या
सत्यनारायणार्चनं॥५६॥कृत्वाकामानवाप्नोतिविधिनाचिंतितांस्ततः
इतिहासमिमंभक्त्याश्रृणुयाद्वाप्ययोनरः॥५७॥सोपिविष्णुप्रियकरः
काम्यसिद्धिमवाप्नुयात्॥५८॥इतिश्रीस्कंदपुराणेरेवाखंडेश्रीसत्यना
रायणव्रतेतिहासेचतुर्थोध्यायः॥४॥सूतउवाच॥अथान्यच्चप्रव
क्ष्यामिश्रृणुध्वंमुनिसत्तमाः॥आसीत्साधुध्वजोराजाप्रजापालनतत्परः॥ १९

१॥प्रसादंसत्यदेवस्यत्यक्त्वादुःखमवापसः॥एकदासवनंगत्वाहत्वाब
हुविधान्पशून्॥२॥आगम्यवटमूलंसद्दृष्टंसत्यस्यपूजनं॥गोपाःकुर्वं
तिसंतुष्टाःभक्तियुक्तेनचेतसा॥३॥राजादृष्ट्वातुदर्पेणनगतोननामसः॥
ततोदुःखंमहत्प्राप्तंसत्यदेवप्रकोपतः॥४॥ततोगोपगणाःसर्वेप्रसादंनृप
सन्निधौ॥संस्थाप्यपुनरागत्यभुक्त्वायुःसुखमीप्सितं॥५॥तंप्रसादम
पित्यक्त्वाद्येवंदुःखमवापसः॥तस्यपुत्रशतंनष्टंधनधान्यादिकंच
यत्॥६॥सत्यदेवेनतत्सर्वंनाशितंममनिश्चितं॥अतस्तत्रैवगच्छामियत्रदे
वस्यपूजनं॥७॥इतिनिश्चित्यमनसाययौगोपालसन्निधिं॥ततोसौस
त्यदेवस्यपूजांगोपगणैःसह॥८॥भक्तिश्रद्धान्वितोभूत्वाचकारविधिना

नृपः॥सत्यदेवप्रसादेनधनपुत्रान्वितोभवत्॥९॥इहलोकेसुखंभुक्त्वा
पश्चात्सत्यपुरंययौ॥यइदंकुरुतेनित्यंव्रतंपरमदुर्लभं॥१०॥शृणोति
नकथांपुण्यांभक्तियुक्तःफलप्रदां॥धनधान्यादिकंतस्यभवेत्सत्यप्र
सादतः॥११॥दरिद्रोलभतेवित्तंबद्धोमुच्येतबंधनात्॥भीतोभयात्प्रमु
च्येतसत्यमेतंनसंशयः॥१२॥इतिवःकथितंविप्राःसत्यनारायणव्रतं
॥यत्कृत्वासर्वदुःखेभ्योमुक्तोभवतिमानवः॥१३॥विशेषतःकलियुगे
सत्यपूजाफलप्रदा॥केचित्कालंवदंत्येतंसत्यमीशंतमेवहि॥१४॥
सत्यनारायणंकेचित्सत्यदेवंतथापरे॥नानारूपधरोभूत्वासर्वेषामी
प्सितप्रदः॥१५॥भविष्यतिकलौसत्यव्रतरूपीसनातनः॥यइदंपठते

तेनित्यंशृणोतिमुनिसत्तमाः॥१६॥तस्यनश्यंतिपापानिसत्यदेवप्र
सादतः॥इतिश्रीमत्स्कंदपुराणेरेवाखंडेसत्यनारायणायरथर्थाय
श्रीमहादशरथीरामचंद्रजनेतिहासेपंचमोध्यायः॥५॥ ५ ॥ ८
ईश्वरकीमददतसेगोविंदरघुनाथथत्तेनेअपनेबनारसअखबारकेछापेखा
नेमेयसत्यनारायणकीपोथीछपवाया॥पोथी२५५बकलंमा० छापने
वालापंचमकींमतफीपोथी८॥आठाईआनामीतीभादो
वदी४शुक्रवारशाके१७७७आगस्त३१सन्१८५५ई०
बनारसईलाकेभैयरबनाथमहल्लेदुधविनायकमेमीलेगी